दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-186 | 1 | अप्रैल 28, 2026 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लद्वादशी
बैशाख 15 प्रविष्ठांशः मङ्गलमयः भवेत्

2 राष्ट्रपतेः हिमाचल-प्रवासः - शिमलां प्राप्ता द्रौपदी मुर्मू, राज्यपाल-मुख्यमन्त्रिभ्यां कृतं भव्यं स्वागतम्

3 संस्कृतयोजनाभ्यः आवेदनम् आरब्धम्; शोध-छात्रवृत्त्योः अपि अवसराः

4 महाराष्ट्र-परिवहन-मन्त्रिणः निर्णयः: वाहनचालकानां कृते मराठी-अनिवार्यतायाः स्थगनम्

## नवदेहल्यां भारत-न्यूजीलैण्ड-देशौ ऐतिहासिकं मुक्तव्यापारसमन्वये हस्ताक्षरं कृतवन्तौ




**हिमसंस्कृतवार्ताः नवदेहली।** नवदेहल्यां भारत-न्यूजीलैण्ड-देशौ ऐतिहासिकं मुक्तव्यापारसमन्वये हस्ताक्षरं कृतवन्तौ। वाणिज्य-उद्योग-मन्त्रिणः पीयूष गोयलस्य, न्यूजीलैण्ड-देशस्य वाणिज्य-मन्त्रिणः टोड मैक्ले-वर्यस्य च उपस्थितौ सन्धेः औपचारिकता अभवत्। दिसम्बर-मासे अन्तिमीकृतः अयं सन्धिः भारतीय-निर्यातानां सर्वासु प्रशुल्करेखासु शतप्रतिशतं यावत् शुल्कमुक्तं प्रवेशं प्रददाति, तथैव विभिन्नेषु सेवाक्षेत्रेषु, यथा शिक्षायां, स्वास्थ्यसेवायां, गतिशीलतायां, निवेशे च अवसरान् उद्घाटयति। न्यूज़ीलैण्ड-देशः अपि भारते वृद्धिं, नवान्वेषणं, उद्योगान् च समर्थयितुं विंशति बिलियन यू. एस. डालर मितस्य दीर्घकालिकं निवेशं कर्तुं स्वीकृतिः प्रदत्तवान्। दुग्धव्यवसायः, कृषिः इत्यादीनि संवेदनशीलक्षेत्राणि संरक्षितानि एव सन्ति। एकस्मिन् सन्देशे, प्रधानमन्त्री श्रीमोदी उक्तवान् यत् अयं सन्धिः भारतस्य वैश्विक सहभागितायां ऐतिहासिकं सोपानं निर्दिशति तथा च कृषकाणां, यूनां, उद्यमशीलानां तथा एम. एस. एम. ई. इत्येतेषां कृते नूतनानां अवसराणां सरजनं करिष्यति। न्यूज़ीलैण्ड-देशस्य प्रधानमन्त्री क्रिस्टोफर लक्सन इत्येषः अपि एनं व्यवहारं विशालः अवसरत्त्वेन वर्णितवान्, येन अग्रिमे दशके निर्यातस्य विविधीकरणे, व्यापारस्य सम्वर्धने च साहाय्यं भविष्यति। कार्यक्रमे भाषमाणः श्रीगोयलः अवदत् यत् एफ. टी. ए. इतीदं नवमासेषु एव सम्पन्नम्, यत् दृढं परस्परविश्वासं प्रतिविम्बयति। श्री गोयलेन उक्तं यत् भारतस्य विकसितराष्ट्रस्य लक्ष्यं प्रति एतत् महत्त्वपूर्ण सोपानम् अस्ति। श्री मैक्क्ले वर्यः अवदत् यत् अयं सन्धिः निर्यातकेभ्यः प्रमुखाः अवसराः उद्घाटयिष्यति, न्यूज़ीलैण्ड-देशे च सहस्रशः उद्योगाः कल्पयिष्यन्ते। विदेशमन्त्री डा. एस. जयशङ्करः उक्तवान् यत् अयं सन्धिः ऐतिहासिकः, येन आर्थिकसम्बन्धाः सुदृढाः भविष्यन्ति, निवेशाः च वर्धिष्यन्ते।

## प्रधानमन्त्री नरेन्द्रमोदी सिक्किम-राज्यस्य द्विदिवसीय यात्रायाम् अस्ति



प्रधानमन्त्री नरेन्द्रमोदी सिक्किम-राज्यस्य द्विदिवसीय यात्रायां अस्ति। सः गतदिवसे गंगटोक नगरे एकस्मिन् पथ प्रदर्शने भागं भजितवान्। तेन सः राज्यस्य मुख्यमन्त्री प्रेम सिंह तमांगः राज्य भाजपा अध्यक्षः डी आर थापा च उपस्थितौ आस्ताम् । अद्य प्रधानमन्त्री गङ्गटोक-नगरस्य आर्किडेरियम्-इत्यत्र गमिष्यति, यत्र राज्यस्य पारिस्थितिक-पुष्प-परम्परां प्रदर्शयितुं विश्व-स्तरीय-आर्किड्-अनुभव-केन्द्रम् अस्ति। सः पलजोर-क्रीडाङ्गणे सिक्किम-राज्यस्य पञ्चशत्तमस्य राज्यत्व-उत्सवस्य समापनसमारोहे अपि भागं ग्रहीष्यति। अस्मिन् अवसरे, श्रीमोदी सम्पूर्ण राज्ये चतुः सहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनं, शिलान्यासं लोकार्पणं च करिष्यति।

## राज्यसभायां भाजपेति दलस्य सांसदानां सङ्ख्या त्रयोदशाधिकैकशतं यावत् वर्धिता

राज्यसभायां भाजपेति दलस्य सांसदानां सङ्ख्या त्रयोदशाधिकैकशतं यावत् वर्धिता। केन्द्रीय-संसदीय कार्यमन्त्री किरेन रिजिजुः सामाजिक-पटले सूचितवान् यत् उच्चसदनस्य अध्यक्षः सी.पी. राधाकृष्णन् वर्यः आम आदमी-दलस्य सप्तसदस्यानां विलीनीकरणं स्वीकृतवान्। सांसदेषु राघव चड्डा, डा. अशोककुमार मित्तलः, सन्दीप पाठकः, स्वाति मालीवालः, हरभजन सिङ्घः च सन्ति। विलयनानन्तरं उच्चसभायां आम आदमी-दलस्य सांसदानां सङ्ख्या अधुना त्रीणि एव अभवत्।

## ऋतु-विभागः

भारत-ऋतु-विभागेन (आई. एम. डी.) इत्यनेन हरियाणा, चण्डीगढ, मध्यप्रदेश, पञ्जाब, राजस्थान, उत्तरप्रदेश, बिहार, छत्तीसगढ, गुजरात, विदर्भ-प्रदेशेषु उष्णतरङ्गस्य पूर्वानुमानं प्रकटितम्।

## सर्वोच्चन्यायालयेन एकस्याः महिला-अधिवक्तायाः उपरि तस्याः पतिना कृत क्रूरतया उत्पीडने स्वयमेव अवधानं स्वीकृतम्

भारतस्य सर्वोच्चन्यायालयेन एकस्याः महिला-अधिवक्तायाः उपरि तस्याः पतिनाकृत क्रूरतया उत्पीडने स्वयमेव अवधानं स्वीकृतम्, त्रयः चिकित्सालयाः तस्याः आपत्कालिकोपचारं निराकृतवन्तः इति आरोपस्य अन्वेषणाय आदेशाऽपि प्रदत्तः। मुख्यन्यायाधीशः सूर्यकान्तः, न्यायाधीशः जे. जोयमल्या बागची इत्येतयोः पीठेन अधिवक्ता स्नेहा कालिता इत्यस्याः पत्रस्य आधारेण कार्याचरणम् स्वीकृतम् यत् करकरडूमा-न्यायालये अभ्यासं कुर्वती स्वसहकर्मिणां उपरि आक्रमणस्य विषये वर्णितम् आसीत्। न्यायालये सूचितं यत् पीडिता बहुवारं व्रणितासीत्, अखिल भारतीय आयुर्विज्ञान संस्थाने उपचारारम्भात् प्राक् सा अनेकेषु चिकित्सालयेषु गतवती, परञ्च ते कथितरूपेण प्रवेशं निराकृतवन्तः। अधिकारिणः उक्तवन्तः यत् एफ. आई. आर पञ्जीकृतं तथा अभियुक्तः पतिः निगडितः।

## बाङ्ग्लादेशे कालवैशाखी इत्यनेन वातचक्रेण चतुर्दश जनाः मृताः, अन्ये च अनेके व्रणिताः अभवन्

बाङ्ग्लादेशे कालवैशाखी (नोर्वेस्टर्) इत्यनेन वातचक्रेण सप्तमण्डलेषु विद्युत-पतनेन न्यूनातिन्यूनं चतुर्दश जनाः मृताः, अन्ये च अनेके व्रणिताः अभवन्। देशस्य केषुचित् भागेषु एकसप्ताहाधिकं यावत् तीव्र-उष्णतरङ्गस्य अनन्तरं वातचक्रः आगतः।

## सुभाषितम्

**यावत् भ्रियते जठरं,
तावत् सत्वं हि देहिनाम्।
अधिकं योऽभिमन्येत,
स स्तेनो दण्डमर्हति।।**

जब तक सभी प्राणियों का उदर आहार ग्रहण करने की क्षमता रखता है तभी तक वे जीवित रहते हैं, अतः जो भी अपने उदर की क्षमता से अधिक पाने की इच्छा रखता है वह दूसरों का हक छीनने वाले एक चोर के समान सजा दिये जाने के योग्य है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय प्रचाराभियानं सम्पन्नम्

पश्चिमबङ्गालराज्ये विधानसभा-निर्वाचनस्य द्वितीयान्तिमचरणाय प्रचाराभियानं गतदिवसे सम्पन्नम्। अस्मिन् चरणे बुधवासरे अष्ट-निर्वाचनमण्डलेषु आहत्य द्विचत्वारिंशदधिकैक शतासनानां कृते मतदानं भविष्यति। एतेषु मण्डलेषु कोलकाता-उत्तरम्, कोलकाता-दक्षिणं, हावडा, नादिया, उत्तर-24 परगना, दक्षिण-24 परगना, हुगली, पूर्व-बर्धमानः चास्ति। सर्वेषां प्रमुखाणां दलानां नेतारः मतदातॄन् आक्रष्टुं अन्तिम प्रयासं कुर्वन्तः सन्ति।

# राष्ट्रपतेः हिमाचल-प्रवासः - शिमलां प्राप्ता द्रौपदी मुर्मू, राज्यपाल-मुख्यमन्त्रिभ्यां कृतं भव्यं स्वागतम्



**हिमसंस्कृतवार्ताः -शिमला।**
भारतस्य राष्ट्रपतिः द्रौपदी-मुर्मू-वर्या ग्रीष्मकालीन-प्रवासाय सोमवासरे मध्याह्ने १२ वादनात् पश्चात् शिमलां प्राप्ता। राष्ट्रपतेः शिमला-आगमने राज्यपालः कविन्द्रगुप्तः मुख्यमन्त्री सुखविन्दरसिंहसुक्खुश्च अन्यैः जनैः सह तस्याः भव्यं स्वागतं कृतवन्तः। अस्मिन् अवसरे हिमाचलप्रदेश-विधानसभायाः अध्यक्षः कुलदीपसिंहपठानिया, ग्रामीणविकास-पञ्चायतीराजमन्त्री अनिरुद्धसिंहः (यः राष्ट्रपतेः प्रवासाय 'मन्त्री-इन्-वेटिङ्ग' इति नामितः अस्ति), सासंदः सुरेशकुमारकश्यपः, शिमला-नगरनिगमस्य महापौरः सुरेन्द्रचौहानः, मुख्यसचिवः सञ्जयगुप्तः, आरक्षक-महानिदेशकः अशोकतिवारी, 'चीफ-ऑफ-स्टाफ' लेफ्टिनेण्ट् जनरल एस.एस. धैय्या इत्यादयः राज्यसर्वकारस्य सेनायाश्च वरिष्ठाधिकारिणः अपि उपस्थिताः आसन्।
उल्लेखनीयमस्ति यत् राष्ट्रपतिः मुर्मु १ मई दिनाङ्कपर्यन्तं हिमाचले स्थास्यति। राष्ट्रपतेः हिमाचल-प्रवासं लक्षीकृत्य राजधान्यां शिमलायां सुरक्षायाः सुदृढाः प्रबन्धाः कृताः सन्ति। सुरक्षादृष्ट्या नगरे विशालं आरक्षकबलं नियुक्तं वर्तते, प्रतिक्षणं च आरक्षकाः अन्यसुरक्षासंस्थानां भटाश्च सन्नद्धाः सन्ति। नगरस्य मार्गेषु उभयतः 'बैरिकेडिङ्ग' (रोधनम्) कृतं वर्तते, येन यातायात-व्यवस्थितौ कोऽपि व्याघातः उत्पन्नः न भवेत्।

# शिमला-नगरे हाइड्रोलिक-पार्किङ्ग-व्यवस्था निर्मास्यते, १२०० कोटि-रूप्यकैः शहरी- विकास- योजनायां कार्याणि भविष्यन्ति- विक्रमादित्यः



**हिमसंस्कृतवार्ताः- शिमला ।**चतुर्दशे जिला शिमला आईटीआई (औद्योगिक- प्रशिक्षण- संस्थानस्य) महिला-क्रीडास्पर्धायाः समापन- समारोहः चौड़ा मैदानस्थले आयोजितः। अस्मिन् कार्यक्रमे लोक-निर्माण- शहरी- विकास- मन्त्री विक्रमादित्य सिंह मुख्यातिथिरूपेण उपस्थितः आसीत्। सः अवदत् यत् प्रदेशस्य राजधान्यां शीघ्रमेव हाइड्रोलिक-पार्किङ्ग-व्यवस्था निर्मास्यते। अस्य कृते नगरस्य समीपे पञ्चदश स्थानानि चयनितानि सन्ति, एतत् कार्यं च प्रदेशे १२०० कोटि-रूप्यकैः शहरी-विकास-योजनायाः अन्तर्गतं क्रियते।हाइड्रोलिक-पार्किङ्ग-व्यवस्थायाः निर्माणेन नगरस्य यातायात-व्यवस्थायां लाभः भविष्यति, जनानां च अधिकेषु स्थानेषु पार्किङ्ग-सुविधा उपलभ्यते। सः अपि अवदत् यत् एकस्मिन् महत्वपूर्णे उपलब्ध्यां केन्द्रमन्त्रिणा आश्वासनं दत्तं यत् १२०० कोटि-रूप्यकाणां प्राथमिक-परियोजनाः विस्तृत- परियोजना-प्रतिवेदनं (डीपीआर) प्रस्तुत्य शीघ्रमेव अनुमोदनं प्राप्स्यन्ति। प्रस्तावित-परियोजनासु शिमलानगरस्य प्रमुखक्षेत्रेषु सम्मर्द-न्यूनता, हाइड्रोलिक- पार्किङ्ग- प्रणाल्याः विकासः, भूमिगत- उपयोगिता- नलिकानां स्थापने तथा कांगड़ा एयरोसिटी इव नियोजित-नगर-समूहस्य विकासः अन्तर्भवन्ति।
विक्रमादित्यसिंह अवदत् यत् क्रीडा सर्वाङ्गीण-विकासस्य अत्यावश्यकः अङ्गः अस्ति। शिक्षण-संस्थानेभ्यः उत्कृष्टाः क्रीडकाः निर्गत्य देशस्य प्रदेशस्य च नाम उज्ज्वलयन्ति। आईटीआई-संस्थासु कौशल-शिक्षायाः प्रोत्साहनं क्रियते, येन सरकारी-निजी-क्षेत्रयोः रोजगार-अवसराः प्राप्यन्ते, स्व-रोजगारस्य अपि अपरिमिताः सम्भावनाः सन्ति। सः उक्तवान् यत् कौशले निपुणतां प्राप्ताः छात्राः आत्मनिर्भराः भविष्यन्ति।
प्रदेशस्य सर्वासु आईटीआई-संस्थासु आधुनिक-सुविधाभिः युक्ता कौशल-शिक्षा प्रदीयते, परिसर-नियोजन- प्रक्रियया छात्रेभ्यः बहुराष्ट्रीय- संस्थानेषु रोजगारः उपलभ्यते। तेन क्रीडास्पर्धाया आयोजनार्थं विधायक-निधेः ४१,००० रूप्यकाणां अनुदानस्य घोषणा कृता। तेन सह शिमला- आईटीआई-संस्थायै उत्कृष्ट-प्रदर्शनाय १५,००० रूप्यकाणि, छात्रायै ममता-नाम्न्यै ५,००० रूप्यकाणि प्रोत्साहनरूपेण दत्तानि। अस्मिन् अवसरे मुख्यातिथिः शाल- टोपी- स्मृतिचिह्नैः सम्मानितः।
चतुर्दशतमी जिला शिमला आईटीआई महिला-क्रीडास्पर्धा २४ अप्रैलतः २७ अप्रैलपर्यन्तं आयोजिता आसीत्। राजकीय- आईटीआई-जुब्बलस्य प्रतिनिधयः, शिमला जिला आईटीआई स्पोर्ट्स कल्चर काउंसिल अध्यक्षः विवेक मेहता, राजकीय- आईटीआई- शिमलायाः प्रधानाचार्यः कार्तिकठाकुरः, परेड-कमाण्डर पूनम ठाकुर, संजयकुमारः, सूरज प्रकाशः, अन्ये बहवः गणमान्याः तथा छात्रा चापि उपस्थिताः आसन्।

# केन्द्रसर्वकारेण आरडीजी (RDG) इति निरुद्ध्य प्रदेशस्य जनानाम् एषः अधिकारः अपहृतः-मुख्यमन्त्री

मुख्यमन्त्री सुखविन्दर सिंह सुक्खू महोदयः सोमवासरे शिमला-मण्डलस्य कसुम्पटी-विधानसभाक्षेत्रस्य 'चियोग' इत्यत्र अवदत् यत् एतत् दौर्भाग्यपूर्णम् अस्ति यत् अस्मिन् वारे केन्द्रसर्वकारेण आरडीजी (RDG) इति निरुद्ध्य प्रदेशस्य जनानाम् एषः अधिकारः अपहृतः। तेन उक्तं यत् वैश्विक-उष्णीकरणस्य (Global Warming) कारणात् वर्तमान-राज्यसर्वकारेण द्वयोः विशाल-प्राकृतिक-आपदयोः सामना कृतः, ययोः जन-धनयोः महती हानिः अभवत्। सः अवदत्, "अहम् एकस्य सामान्य-परिवारस्य वेदनां अनुभवामि।

# रोहड़ू-नगरपरिषदः नारकण्डा-नगरपञ्चायतस्य च निर्वाचन-समयसारिणी प्रसारिता

राज्य-निर्वाचन-आयोगेन रोहड़ू-नगरपरिषदः तथा नारकण्डा-नगरपञ्चायतस्य साधारण-निर्वाचनानां कृते निर्वाचन-समयसारिणी (Schedule) प्रसारिता। नगरपरिषदः नगरपञ्चायतस्य च मतदाता-सूच्याः अप्रसारणकारणात् एषा प्रक्रिया स्थगिता आसीत्। सम्प्रति प्रदेशे ५३ नगरीय-निकायेषु निर्वाचनानि भविष्यन्ति।
निर्वाचन-कार्यक्रमानुसारं नामाङ्कन-पत्राणां प्रस्तुतीकरण-प्रक्रिया ५ मई दिनाङ्कतः आरभ्य ७ मई २०२६ दिनाङ्कपर्यन्तं चलिष्यति। प्रत्याशिनः निर्धारितस्थानेषु प्रातः ११:०० वादनतः अपराह्णे ३:०० वादनपर्यन्तं स्व-नामाङ्कनपत्राणि प्रदातुं शक्ष्यन्ति। तदनन्तरं ८ मई दिनाङ्के नामाङ्कनपत्राणां सूक्ष्म-परीक्षणं (Scrutiny) भविष्यति। प्रत्याशिभ्यः नामाङ्कन-प्रत्याहरणाय (नामाङ्कनवापसी) ११ मई दिनाङ्कस्य अपराह्णे ३:०० वादनपर्यन्तं समयः दत्तः अस्ति।
तस्मिन्नेव दिने प्रत्याहरण-प्रक्रियायाः समाप्तेः तत्कालं पश्चात् निर्वाचन-प्रत्याशिनां अन्तिमा सूची प्रसारयिष्यते तेभ्यः निर्वाचन-चिह्नानि अपि वितरिष्यन्ते। आयोगानुसारं मतदानं २२ मई २०२६ दिनाङ्के प्रातः ७:०० वादनतः अपराह्णे ३:०० वादनपर्यन्तं भविष्यति। यदि आवश्यकता भवेत् तर्हि मतदानात् तत्कालं पश्चात् सम्बद्ध-नगरनिकाय-मुख्यालयेषु मतगणना आरप्स्यते। अनेन सहैव आयोगेन निर्दिष्टं यत् मतदान-केन्द्राणां सूची ५ मई २०२६ पर्यन्तं प्रदर्शिष्यते। राज्य-निर्वाचन-आयुक्तः अनिल कुमार खाची महोदयः अवदत् यत् नगरपरिषदः नगरपञ्चायतस्य च समयसारिणी प्रसारिता वर्तते।

# हिमाचलप्रदेशे विमान-मार्ग-सम्पर्कयोः बाधाः निवृत्ताः भविष्यन्ति, लोकलेखासमित्याः गोष्ठ्यां सासंदेन अनुरागठाकुरेण उत्थापिताः विषयाः



**हिमसंस्कृतवार्ताः - धर्मशाला।**
हिमाचलप्रदेशस्य पर्यटनम् आधारभूत-संरचनां च नूतन-उत्तुङ्गतां प्रति नेतुं उद्देशेन सोमवासरे धर्मशालायां आयोजितायां लोकलेखासमित्याः (PAC) महत्त्वपूर्णायां गोष्ठ्यां सासंदेन अनुरागसिंहठाकुरेण प्रदेशस्य ज्वलन्त-समस्याः प्रमुखतया उत्थापिताः। गोष्ठ्यां नागरिक-विमानन-पर्यटन-मार्ग-सदृशाणां महत्त्वपूर्णानां मन्त्रालयानां शीर्ष-अधिकारिभिः सह चर्चां कुर्वता तेन स्पष्टीकृतं यत् धर्मशाला-शिमला-सदृशाणां प्रमुखाणां केन्द्राणां सम्पर्क-विकासः (Connectivity) राज्यस्य अर्थव्यवस्थायाः कृते अनिवार्यं वर्तते।नागरिक-विमानन-मन्त्रालयस्य भारतीय-विमानपत्तन-प्राधिकरणस्य च अधिकारिभिः सह 'उड़ान' योजनायाः समीक्षां कुर्वता अनुरागठाकुरेण धर्मशाला-विमानपत्तनस्य (Airport) विस्तारे विलम्बे चर्चां कृतवान्। मार्ग-परिवहन-राजमार्ग-मन्त्रालयेन राज्यसर्वकारेण च सह जातायां गोष्ठ्यां अनुरागठाकुरेण सद्यः प्रवृत्तस्य नूतन-मार्ग-करस्य (Road Tax) तथा सार्वजनिक-मार्गेषु 'यूजर-चार्जेस' (User Charges) इत्यस्य नियमनस्य विषयः उत्थापितः।

# नगरनिगमनिर्वाचनम् - २९ अप्रैल दिनाङ्के धर्मशालायां काङ्ग्रेस-प्रत्याशिनां नामाङ्कनं सम्भवम्, भाजपा-प्रभारी अपि शिमलां प्राप्तवान्



**हिमसंस्कृतवार्ताः - शिमला।**
नगरनिगमनिर्वाचनानि अधिकृत्य काङ्ग्रेस-दलेन सज्जीकरणानि तीव्रतरणि कृतानि। पक्षः २९ अप्रैल दिनाङ्के धर्मशालायां प्रस्तावित-निर्वाचनसमित्याः गोष्ठ्यां प्रत्याशिनां घोषणा कर्तुं शक्नोति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः, प्रदेशाध्यक्षः विनयकुमारः, प्रदेशप्रभारी रजनीपाटिल इत्यादयः अन्ये वरिष्ठनेतारः धर्मशालां प्राप्स्यन्ति। सायङ्काले ६:०० वादने आयोज्यमानायां गोष्ठ्यां चतुर्णां नगरनिगमानां प्रत्याशिनां नामानि अन्तिमरूपेण निश्चितानि भवितुं शक्नुवन्ति। ३० अप्रैल दिनाङ्के जनपद-अध्यक्षाणां प्रशिक्षणक्रमे राहुलगाधिनः धर्मशाला-प्रवासं दृष्ट्वा काङ्ग्रेस-नेतृत्वं दिनमेकं पूर्वमेव प्रत्याशी-चयनप्रक्रियाम् समापयितुम् इच्छति। एतदर्थं धर्मशाला-पालमपुर-सोलन-मण्डी-नगरनिगमनिर्वाचनाय नियुक्ताः प्रभारिणः निरीक्षकाः (Observers) च स्व-प्रतिवेदनानि प्रस्तोष्यन्ति, येषाम् आधारेणैव 'नामपत्राणां' (Ticket) वितरणं भविष्यति। अस्मिन् अन्तराले सम्बद्धक्षेत्राणां प्रभारी-मन्त्रिणः अपि सक्रियताम् अवर्धयन्। सोलन-नगरस्य उत्तरदायित्वं निर्वहन् उद्योगमन्त्री सोमवासरे सोलन-नगरे गोष्ठीं कृत्वा प्रतिपुष्टिं (Feedback) स्वीकृतवान्, मण्डी-प्रभारी विक्रमादित्यसिंहः अपि क्षेत्रे सक्रियः अस्ति। पक्षस्य सूत्राणाम् अनुसारं सोलन-नगरनिगमस्य प्रत्याशिनां घोषणा अपि अस्यामेव गोष्ठ्यां भविष्यति, यदा तु पालमपुर-धर्मशाला-नगरनिगमानां प्रत्याशिनां प्रथमा सूची मङ्गलवासरे प्रसारिता भवितुं शक्नोति।

## भाजपा-प्रभारी शिमलां प्राप्तवान्, प्रत्याशिनां विषये भविष्यति मन्थनम्

प्रदेशे नगरनिगमनिर्वाचनाय भारतीय-जनता-पार्टी (भाजपा) इति दलेन सङ्घटनात्मकप्रवृत्तयः तीव्रतराः कृताः। अस्मिन् क्रमे प्रदेशप्रभारी श्रीकान्तशर्मा सोमवासरे सायङ्काले शिमलां प्राप्तवान्। 'दीपकमलम्' इति पक्षमुख्यालये तस्य भव्यं स्वागतं कृतम्। मङ्गलवासरे पक्षमुख्यालये धर्मशाला-मण्डी-पालमपुर-सोलन-नगरनिगमानां प्रत्याशिनां नामानि अधिकृत्य विचार-विमर्शः भविष्यति। सम्भावना अस्ति यत् सायङ्कालपर्यन्तं प्रत्याशिनां प्रथमा सूची प्रसारिता भवेत्। भाजपा-नेतृत्वम् अस्मिन् वारे निर्वाचनेषु कामपि त्रुटिं कर्तुं न इच्छति। प्रदेशप्रभारी श्रीकान्तशर्मा, डॉ. राजीवबिन्दलः, जयरामठाकुरश्च संयुक्तगोष्ठ्यां प्रत्याशी-चयनेन सह स्थानीयसमीकरणानां, विजयसम्भावनानां, सङ्घटनात्मकसुदृढतायाश्च विषये गम्भीरां चर्चां करिष्यन्ति। गोष्ठ्यां चतुर्णां नगरनिगमानां कृते निर्मिताभिः प्रबन्धन-टोलीभिः (Management Teams) सह पृथक्-पृथक् सत्राणि अपि आयोजयिष्यन्ते।

# संस्कृतयोजनाभ्यः आवेदनम् आरब्धम्; शोध-छात्रवृत्त्योः अपि अवसराः

**हिमसंस्कृतवार्ता नवदेहली।** केन्द्रीय संस्कृत विश्वविद्यालयेन शिक्षा मन्त्रालयस्य सहयोगेन वित्तीयवर्षस्य (२०२६-२७) कृते संस्कृत संवर्धन योजनानां अन्तर्गतं ऑनलाइन-आवेदनानि आहूतानि सन्ति। कुलपतिः प्रो. श्रीनिवास वरखेडी महोदयेन उक्तं यत् एतासां योजनानां कृते विश्वविद्यालयः 'नोडल एजेन्सी' (मुख्यसंस्था) अस्ति। योजनायाः उद्देश्यं संस्कृत-पालि-प्राकृत भाषाणां शोधकार्यस्य प्रचार-प्रसारस्य च संवर्धनं वर्तते।

**छात्रवृत्तिः-:** कक्षा ९ तः पी.एच.डी. पर्यन्तं छात्रेभ्यः ५,००० तः ३५,००० रूप्यकाणां वार्षिकवृत्तिः दास्यते।

**शिक्षकेभ्यः प्रोत्साहनम्-:** संस्कृतशिक्षकेभ्यः २.४० लक्ष रूप्यकाणि यावत् प्रोत्साहनराशिः प्रदास्यते।

**अनुदानम्-:** संगोष्ठीनां (Seminars) आयोजनाय १ लक्ष रूप्यकाणि यावत् अनुदानं भविष्यति।

**विद्वत्-सहायता-:** अभावग्रस्तेभ्यः पण्डितेभ्यः ६०,००० रूप्यकाणां सहायता लप्स्यते।

**शास्त्रचूडामणि योजना-:** अस्याः अन्तर्गतं विद्वांसः २.४० लक्ष रूप्यकाणां वार्षिक-सम्मानराशिं प्राप्स्यन्ति।

**महत्त्वपूर्ण्यः तिथयः-:** आवेदनारम्भः: १ अप्रैल दिनाङ्कात्। अन्तिमतिथिः: विभिन्नयोजनानां कृते ३० जून तथा ३१ अगस्त च निर्दिष्टा अस्ति। इच्छुकाः अभ्यर्थिनः ऑनलाइन-आवेदनानन्तरं २० दिनाभ्यन्तरे स्व-आवेदनस्य 'हार्ड कॉपी' (मुद्रितप्रतिम्) समर्पयेयुः।

# पुरीस्थे श्रीजगन्नाथ- संस्कृत- विश्वविद्यालये वाग्वर्धिनीसभायाः एकादशं सत्रं समाचरितम्




हिमसंस्कृतवार्ता। 25/4/26 तमे दिनाङ्के शनिवासरे पुरीस्थे श्रीजगन्नाथ- संस्कृत- विश्वविद्यालये वाग्वर्धिनीसभायाः एकादशं सत्रं समाचरितम्। सत्रस्यारम्भे लौकिकं मङ्गलं समाचरत् न्यायविभागस्य आचार्यप्रथमवर्षस्य छात्रा आकाङ्क्षा प्रि. सामलः। सत्रे षट् छात्राः स्वीयम् अभीप्सितं विषयम् उपस्थापयन्। व्याकरणविभागस्य आचार्यप्रथमवर्षस्य छात्रा पूजाराणी साहू (र-प्रत्याहारः), देवस्मिता राउलः (ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति), शुभस्मिता दाशः (अनेकान्ताः अनुबन्धाः), राकेशः सबरः (शब्दानुशासनस्य मुख्यप्रयोजनानि)। व्याकरणाचार्यस्य द्वितीयवर्षस्य एस. शुभश्री संस्कृतगीतम् अगासीत्। न्यायविभागस्य आकाङ्क्षा च मधुरष्ठकेन सभाम् अमूमुदत्। इयं वाग्वर्धिनी सभा प्रतिसप्ताहं शनिवासरे समाचर्यते। अत्रावसरे विभिन्नेभ्यः विभागेभ्यः पञ्चदश छात्राः सहभागम् अकार्षुः। सत्रेऽस्मिन् समुपस्थिता आसीत् न्यायविभागस्य अध्यापिका डॉ. रश्मिता जेना। धन्यवादज्ञापनं कृतवती न्यायविभागस्य आचार्यप्रथमवर्षस्य छात्रा मोनालिसा पृष्टिः। सत्रसञ्चालनं कृतवती न्यायविभागस्य आचार्यप्रथमवर्षस्य छात्रा शुभस्वागतिका पुहाणः। सत्रसंयोजनपूर्वकं छात्राणां मार्गदर्शनम् व्यधात् परिषत्संयोजिका व्याकरणविभागस्य सहायकाचार्या डॉ. प्रज्ञा। सर्वेषां सहयोगेन कार्यक्रमः सुसम्पन्नः। कल्याणमन्त्रेण सभेयं सम्भूषिता।



# "हंसः बकः च"

एकधनिकः खगानां विपण्यां गतवान् तत्र सः हंसंबको च क्रीतवान्। गानं शृण्वनार्थं हंस, खादनाय बकः च। एकस्यां रात्रौ तस्य गृहे अतिथिः आगतवान्। तेन पाचकं उपस्करबकं पक्वाय आदेशं दत्तः। खगानां प्रकोष्ठे अन्धकारः आसीत्। अन्धकारे पाचकेन हंसं धृत्वा पाकगृहं आनीता। हंसस्य ग्रीवा छुरिकायां कर्तती तस्मिन्नेव क्षणे तेन प्राणाऽक्रोशेन् ध्वनिं कृतवान् किन्तु हंसस्य आक्रोशम् अपि मधुरालापम् अस्ति। तत् श्रुत्वा पाचकहस्तात् छुरिका निपतिता।
सः हंसम् उक्तवान्- योग्यसमयम् उच्चारितां शब्दोऽपि एतादृशी लाभाय भवति। अन्यथा त्वया सह ममापि मृत्यु निश्चितं भविष्यति। यदि अहं त्वां अमारिष्यत् तदा स्वामी ममापि निश्चयेन मारिष्यति।

**डॉ.वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्।**




# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य महती चर्चा श्रुता। गुरुग्रामनगरे एकेन युवकेन स्वस्य मासिक- व्यय-विवरणं प्रदर्शितम्। तेन नवति-सहस्र-रूप्यकाणि व्ययितानि।
**नन्दिनी-** सत्यम्, एतावान् व्ययः सामान्य-जनस्य चिन्तायै भवति। युवकेन बहु धनं व्ययितम्। अपि च, अमेरिकादेशे एकादश- अधिक-शत- वर्षीयः एकः वृद्धः अस्ति। तेन स्वस्य दीर्घायुष्यस्य त्रयः सरलाः नियमाः उक्ताः। सः मद्यपानं न कृतवान् अस्ति।
**काव्या-** अहो, उत्तमः सदाचारः। उत्तम-भोजनेन एव आरोग्यं प्राप्तम्। परं हाङ्गकाङ्ग-नगरे महिला-कर्मकर्यः कष्टेन वसन्ति। ताभिः अवकाश-दिने मार्गेषु करगद-पेटिकासु निवासः कृतः। तत् दृष्ट्वा मम मनः खिन्नम्।
**नन्दिनी-** खिन्नता स्वाभाविकी, यतः तासां परिस्थितिः कठिना अस्ति। परन्तु बेङ्गलूरु-नगरे एकः उदारः व्यवहारः अपि दृष्टः। तत्र एकेन द्विचक्रिका-चालकेन धर्मः कृतः। अत्युष्णे काले तेन निर्धन-श्रमिकाणां कृते मधुरं हिमपयः दत्तम्।

# उत्तरप्रदेशे ऋतुपरिवर्तनम्
## वृष्टेः प्रचण्डवायोः च पूर्वसूचना

भारतीयमौसमविज्ञानविभागेन (IMD) उत्तरप्रदेशस्य अनेकेषु मण्डलेषु 'अलर्ट' इति घोषितम्। अद्य उत्तरप्रदेशस्य लखनऊ, सहारनपुर, मेरठ, बिजनौर, कानपुर इत्यादिषु नगरेषु तीव्रवायुना सह वृष्टेः सम्भावना अस्ति। वायुवेगः ७० कि.मी. प्रतिघण्टा भवितुं शक्नोति, येन उष्णतायाः किञ्चित् उपशमनं भविष्यति।



## सुवर्ण-रजतयोः मूल्ये वृद्धिः

उत्तरप्रदेशस्य सर्राफा-बाजारे अद्य सुवर्णस्य रजतस्य च मूल्येषु महती वृद्धिः दृष्टा। लखनौ नगरे २४ कैरेट सुवर्णस्य मूल्यं प्रायः १,४९,६८० रुप्यकाणि (प्रति १० ग्राम) अभवत्। रजतस्य मूल्यं अपि २,७०,००० रुप्यकाणि प्रति किलोग्राम इति अभवत्, येन क्रेतारः चिन्तिताः सन्ति।



## अयोध्यायां दर्शन-समयस्य विस्तारः

ग्रीष्मकालस्य तीव्रतपं दृष्ट्वा अयोध्यायां श्रीरामजन्मभूमिमन्दिरे भक्तानां कृते विशेषव्यवस्थाः कृताः। मन्दिरप्रशासनेन भक्तानां सुविधायै शीतपेयजलस्य छायायाः च प्रबन्धः कृतः। अद्य सहस्रशः भक्ताः भगवतः रामलल्लायाः दर्शनं कृतवन्तः।

## झाँसी मण्डले भीषणम् आतपम्

विगतसप्ताहे झाँसी मण्डले तापमानं ४७ डिग्री सेल्सियस इति पारं कृतवान्, यत् एशियामहाद्वीपस्य उष्णतमेषु स्थानेषु अन्यतमम् अस्ति। प्रशासनं २८ अप्रैल पर्यन्तं 'लू' (भीषण-आतप-वायु) इत्यस्मात् सावधानं भवितुं जनान् सूचितवान्।



## शिक्षाक्षेत्रे नवीन-प्रयासः

उत्तरप्रदेशसर्वकारेण राज्यस्य माध्यमिकसंस्कृतविद्यालयेषु सङ्गणकशिक्षां (Computer Education) अनिवार्यं कर्तुं निर्णयः स्वीकृतः। अनेन पारम्परिकसंस्कृतशिक्षायाः सह छात्राः आधुनिकप्रौद्योगिक्यां अपि निपुणाः भविष्यन्ति।

# महाराष्ट्र-परिवहन-मन्त्रिणः निर्णयः
## वाहनचालकानां कृते मराठी-अनिवार्यतायाः स्थगनम्

अनुवादः महाराष्ट्रस्य परिवहनमन्त्री प्रताप सरनाइकः उक्तवान् यत् राज्यसर्वकारेण 'ऑटो-रिक्शा' तथा 'टैक्सी' चालकानां कृते मराठीभाषायाः अनिवार्यतायाः निर्णयः सम्प्रति स्थगितः कृतः। मुम्बई-नगरे विभिन्न-चालक-सङ्घैः (Unions) सह वार्तालापानन्तरं मन्त्रिणा उक्तं यत् सर्वेषां सङ्घानां व्यवहारः सकारात्मकः आसीत्, परन्तु तैः एतस्य नियमस्य पालनाय अतिरिक्तसमयः याचितः। श्री सरनाइकः स्पष्टीकृतवान् यत् सर्वकारः मराठीभाषायाः प्रवर्धनाय दृढसङ्कल्पः अस्ति, किन्तु एतेन चालकानां जीविका प्रभाविता न भवेत् इति अपि सुनिश्चितं करिष्यति।

# दिल्ली-विधानसभायाः विशेषसत्रम्
## सुरक्षा-व्यवस्थायाः समीक्षा



अद्य दिल्ली-विधानसभायाः एकदिवसीय-विशेषसत्रस्य आयोजनं भविष्यति। उपराज्यपालस्य अनुमत्या अधिसूचना निर्गता। अस्मिन् सत्रे महिला-आरक्षण-विधेयकः चर्चायाः मुख्यविषयः भवितुं शक्नोति। सत्रस्य आरम्भः प्रातः ११ वादने भविष्यति। अस्य सत्रस्य पूर्वं विधानसभा-सचिवालयस्य सचिवस्य रनजीत-सिंहस्य अध्यक्षतायां एका उच्चस्तरीया सुरक्षा-समीक्षा-उपवेशनं (Meeting) जातम्, यत्र दिल्ली-आरक्षकदलाः (Delhi Police) केन्द्र-सशस्त्र-आरक्षकदलाः च सम्मिलिताः अभवन्।

# सोमनाथ-स्वाभिमान-पर्व, दिल्ली-वासिनां कृते निःशुल्का तीर्थयात्रा



दिल्ली-सर्वकारः नगरवासिनां कृते 'सोमनाथ-स्वाभिमान-पर्व - सोमनाथ-यात्रायाः' आयोजनं करोति। मुख्यमन्त्री रेखा गुप्ता अवदत् यत् ३० अप्रैल् दिनाङ्के सफदरजङ्ग-रेलस्थानकतः १३०० भक्तान् नीत्वा एका विशेष-रेलयानं गुजरातं प्रति गमिष्यति। एषा यात्रा पूर्णतः निःशुल्का भविष्यति, यत्र भक्ताः भगवतः सोमनाथस्य ज्योतिर्लिङ्गस्य दर्शनं करिष्यन्ति। गुजरात-सर्वकारेण भक्तानां भोजन-आवास-जलादीनां व्यवस्था कृता अस्ति। मुख्यमन्त्र्या उक्तं यत् एषः उपक्रमः सनातन-संस्कृतिं राष्ट्रिय-एकतां च सुदृढां करिष्यति।

## डॉ. निखिल-टण्डनः 'एम्स-दिल्ली' इत्यस्य अन्तरिम-निदेशकः

अनुवादः अखिल-भारतीय-आयुर्विज्ञान-संस्थानम् (AIIMS), दिल्ली इत्यनेन सूचितं यत् डॉ. निखिल-टण्डनः संस्थानस्य अन्तरिम-निदेशकत्वेन कार्यभारं स्वीकरिष्यति। डॉ. एम. श्रीनिवासस्य नीति-आयोगे पूर्णकालिक-सदस्यरूपेण नियुक्त्या एषः पदः रिक्तः अभवत्। डॉ. टण्डनः आगामि-षण्मासाभ्यन्तरं वा नियमित-निदेशकस्य नियुक्त्याः पूर्वं पर्यन्तं एतस्मिन् पदे कार्यं करिष्यति।

## पञ्जाब-राज्ये प्रवर्तन-निदेशालयस्य (ED) अन्वेषणम्

अनुवादः पञ्जाबस्य पूर्व-आरक्षक-उपमहानिरीक्षकस्य (DIG) हरचर सिंह भुल्लरस्य विरुद्धं प्रवर्तन-निदेशालयेन (ED) एकादश-स्थानेषु अन्वेषणं (Raid) प्रारब्धम्। एषा कार्यवाही चण्डीगढ़-लुधियाना-पटियाला-नाभा-जालन्धर-इत्यादिषु नगरेषु धन-शोधन-निवारण-अधिनियमस्य (PMLA) अन्तर्गतं क्रियते। भ्रष्टाचार-सम्बद्धेषु अपराधेषु अवैध-उत्कोचस्य (Bribe) स्वीकरणस्य च आरोपाणाम् आधारेण एषः निर्णयः स्वीकृतः।




# भंगे बणाये भंगड़िये चिट्टे बणाये चटेड़ी

नशा पहले हुँदा था सिर्फ शराबा रा
इक्का दुक्का लैंदे थे कदी कदाईं अफीम
पर एह नशा मितरो हुँदा बौहत खराब
नशे पीछे लोकें बेची दित्ती अपणी जमीन

शराबा रे नशे रा इतना बुरा नी थे मनान्दे
हुण नशेयाँ रे हुई गए कई नांव
इतने गुलाम बणी गए नशे रे
कईयें छडी दित्ते घर बार कईयां ते छुटी गए गांव

भंग पीणे वाले जो बोलदे भंगड़िया
सैजे सब नशे करदा तिसजो गलांदे नशेड़ी
दारू पीणे वाले जो गलांदे सब शराबी
अज्जकल चिट्टा लैणे वाले जो बोलदे चटेड़ी

बच्चेयाँ रा कसूर घट कने मावां बुढेयाँ रा ज़्यादा
जे नज़र रखदे बच्चेयाँ पर तां एह छापा नी पौन्दा
भाई बहण बेटा बेटियां किसी रे नी मरदे इस नशे कने
जे अणजाण नी बणदे टैमा पर सब संभाळी रा हुँदा

एह वक्त जे खुंजी गया तां दोबारा नी औणा
शर्म नी करो लोको फेरी बाद च पछताणे पौणा
जे बच्चा कोई पिहंगळी गया तां सब्र करा
कोशिश करनी सबीं कने सै इसा बमारिया ते छुड़ाणा



रवींद्र कुमार शर्मा
घुमारवीं
जिला बिलासपुर हि प्र

## कस्य रूपं श्रेष्ठम्? (कः सुन्दरः?)

एकदा महाराजः अकबरः मुकुरे (Mirror) स्वमुखं पश्यन् आसीत्। सः गर्वितः सन् बीरबलं पृष्टवान्—

**अकबरः-** "बीरबल! पश्य, अहं कियत् सुन्दरः अस्मि! किं मत्तः अपि कोऽपि सुन्दरः जीवः अस्मिन् जगति अस्ति?"

**बीरबलः-** "महाराज! अस्मिन् संसारे प्रत्येकं जीवस्य कृते तस्य सन्तानमेव सुन्दरतमं भवति।"

अकबरः एतत् न अङ्गीकृतवान्। तदा बीरबलः तं वनं नीतवान्। तत्र एका वानरी स्वस्य अतीव कुरूपं शिशुं गाढम् आलिङ्ग्य उपविष्टा आसीत्।

**बीरबलः-:** "पश्यतु महाराज! एषा वानरी स्वस्य एतं 'कुरूपं' बालम् अपि विश्वस्य सुन्दरतमं मन्यते।"

अकबरः सत्यं ज्ञात्वा मस्तकं नतवान्।